तु अर्थमात्रनिष्ठाः । “शब्देभ्योयः पदार्थेभ्य उपमादिप्रतीयते विशिष्टोऽर्थः कवीनां सा उभयालङ्क्रिया मता । उपमा रूपकं साम्यं संशयोक्तिरपह्नुतिः । समाध्युक्तिः समासोक्तिरुत्प्रेक्षाऽप्रस्तुतस्तुतिः । सतुल्ययोगितोलेशः ससहोक्तिः समुच्चयः । आक्षेपोऽर्थान्तरन्यासो विशेषोक्तिः परिष्कृतिः । दीपकक्रमपर्य्याया विषमस्वभाविकः संसृष्टिरिति निर्द्दिष्टास्ताश्चतुर्विंशतिर्बुधैः” इत्युक्ता तेषां लक्षणानि सभेदं तत्रैव दर्शितानि चन्द्रालोकदर्पण रुद्रादिभिश्च सामान्यतोऽगणयित्वा नानाविधा दर्शिताः न संक्षेपतो गणिताः । अथार्थालङ्कारा एकत्र संगृह्य सोदाहरणलक्षणा अकारादिक्रमेण तेषु केचित् दर्शिता अपि क्रमानुरोधात् सर्वएवात्र प्रदर्श्यन्ते ।

१ अक्रमातिशयोक्तिः “अक्रमातिशयोक्तिः स्यात् सहत्वे हेतुकार्य्ययोः” च० । “आलिङ्गन्ति समं देव ! ज्यां परांश्च शरास्तव” ।

२ अतद्गुणः “सङ्गतानुगत्यनङ्गीकारमाहुरतद्गुणम्” च० । “चिरं रागिणि मच्चित्ते निहितापि न रज्यसि” ।

३ अतिशयोक्तिः १०५ पृष्ठे उक्तलक्षणोदाहरणा ।

४ अत्यन्तातिशयोक्तिः “अत्यन्तातिशयोक्तिस्तु कार्य्यहेतुप्रसक्तिजा” च० । “यास्यामीत्युदिते तन्व्या वलयोऽभवदूर्म्मिका” । ऊर्म्मिका वलयोऽभवदित्ययः कृशत्वात्तथात्वम् ।

५ अत्युक्तिः “अत्युक्तिरद्भुताऽतथ्यशौर्य्यौदार्य्यादिवर्णनम्” च० “त्वयि दातरि राजेन्द्र ! याचकाः कल्पशाखिनः” ॥ याचकानां राजतोधनलाभेन कल्पतरुतुल्यताकथनमौदार्य्यस्यात्युक्तिः ।

६ अधिकम् १२५ पृष्ठे लक्षणोदाहरणभेदाः उक्ताः ।

७ अनन्वयः १४९ पृष्ठे उक्तलक्षणोदाहरणः ।

८ अनुकूलम् “अनुकूलं प्रतिकूलमानुकूल्यानुबन्धि चेत्” च० । “कुपिताऽसि यदि तन्वि । निधाय करजक्षतम् । बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा” ।

९ अनुगुणः “प्राक्सिद्धः स्वगुणोत्कर्षोऽनुगुणः परसन्निधेः” च० । “नीलोत्पलानि दधते कटाक्षैरतिनीलताम्” ।

१० अनुज्ञा “दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्” च० । “मय्येव जीर्णतां यातु यत्त्वयेह कृतं हरे ! । नरः प्रत्युपकारार्थं विपत्तिमभिकाङ्क्षति” ।

११ अनुमानम् “अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्” च० । “यत्र पतत्यबलानां दृष्टिर्निशिताः पतन्ति तत्र शराः । तच्चापरोपितशरो धावत्यासां पुरःस्मरो मन्ये” । स०क० विशेष उक्तः । यथा “लिङ्गाद्यल्लिङ्गिनोज्ञानमनुमानं तदुच्यते । पूर्ववच्छेषवच्चैव दृष्टं सामान्यतश्च तत् । फलसामर्थ्यभेदेन द्विधैतत् भिद्यते पृथक्” । तेषु यत्र कारणं दृष्ट्वा कार्य्यमनुमीयते तत् पूर्ववत् । “अविरलविलोलजलज्वलकुटजार्ज्जुननीपसुरभिवनवातः । अयमायातः कालो हन्त हताः पथिकगेहिन्यः” अत्र वर्षर्त्तोः कारणभूतात् कार्य्यं विरहिणीमरणमनुमीयते । यत्र कार्यं दृष्ट्वा कारणमनुमीयते तच्छेषवत् । “मामागमिष्यन्नूनं पतितोऽसि पादयोस्तस्याः । कथमन्यथा ललाटे यावकात्तिलकपङ्क्तिरियम्” । अत्र कार्यभूतया यावकतिलकपङ्क्त्या कारणं पादपतनमनुमीयते । यदुभयविधभिन्नं तत् सामान्यतो दृष्टम् “मत्ता मदान्धस्य शिखण्डियूनो दृष्टेः पुरस्तादचिरप्रभेव” । सेयं विद्युदिव दृष्टेः प्रथममुपलभ्यमाना कामन्दकी अविनाभावेन मालत्यागमनं गमयतीति सामान्यतो दृष्टम् । फलसामर्थ्ययोरुदाहरणानि तत्र दृश्यानि ।

१२ अन्योन्यम् “अन्योन्यं नाम यत्र स्यादुपकारः परस्परम्” च० । “त्रियामा शशिना भाति शशी भाति त्रियामया” । स०क० भेद उक्तः । “अन्योन्यस्योपकारोयस्तदन्योन्यं त्रिधा च तत् । वाच्यं प्रतीयमानं च तृतीयमुभयात्मकम् ! अन्योन्यचूलिकान्योन्यभ्रान्तिरन्योन्यरूपता । अन्योन्यालङ्कृतावत्तस्त्रयमेतदिहेष्यते” । तत्र वाच्यम् । “कण्ठस्य तस्यास्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य । अन्योन्यशोभाजननाद्बभूव साधारणो भूषणभूष्यभावः । प्रतीयमानन्तु अत्रैवान्योन्यपदानुपादाने । अन्योन्यचूलिका अन्योन्यरूपपरिवृत्तिः सा च व्यत्ययेन विनिमयेन च भवति । यथा “लोचनाधरकृताहृतरागा वासितानन विशेषितवासा । वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयञ्च वितेने” । अत्र वारुण्या यदधररागोऽपहृत्य चक्षुषि निक्षिप्तस्तेन व्यत्ययः । यच्च मुखामोदवासितया तया स्वामोदो विशेषितस्तेन विनिमयः तेन परिवृत्तिविनिमयाख्यावलङ्कारावत्रान्तर्भूताविति द्रष्टव्यम् ।

१३ अपह्नवातिशयोक्तिः “रूपकातिशयोक्तिः स्यात् निगीर्य्याध्यवसानतः । यदाऽपह्नुतिगर्भत्वम् सैव सापह्नवा मता ।” च० “त्वत्सूक्तिषु सुधा राजन् ! भ्रान्ताः पश्यन्ति तां विधौ” ।

१४ अपह्नुतिः २४१ पृष्ठे उक्तलक्षणोदाहरणा । स०कण्ठा० अन्यथोक्तम् । “अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थदर्शनम्, औपम्यवत्यनौपम्या चेति सा द्विविधोच्यते” तत्र औपम्यवती यथा “न केतकीनां विलसन्ति सूचयः प्रवा-